# Ganeshakrita Shiva Stuti

# ગણેશકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Ganeshakrita Shiva Stuti

File name : shivastutiHgaNeshakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 24 - kailAsavarNane gaNeshakRitastutiH | 29-36||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# ગણેશકૃતા શિવસ્તુતિઃ

ગણેશઃ -
ગણેશ ત્રિગુણાતીત ભગણાધીશમસ્તક ।
ગર્જન્મેઘગણોદ્ભૂતતટિદ્ગણજટામલ ॥ ૨૯॥

વ્યોમકેશ ભગવન્ શ્રુતિમૌલિસ્તોમસામવિનુતાખિલસોમ ।
ભૂમભૌમમહિમાગમકામ ધૂમધામબહુલદ્યુતિકણ્ઠ ॥ ૩૦॥

ક્ષયદ્ધીરમારાપહારાદ્ય શમ્ભો વીર ધીર સુરશેખરપાદ ।
ઘોરાન્ધકાસુરનિબર્હણ કાલકાલ ક્રૂરાન્તર ત્રિપુરગર્વહરાવ્યયેશ ॥ ૩૧॥

દહરગહનશેખરોऽસિ શમ્ભો નિરવદ્યાખિલલોકસૌખ્ય ભૂમન્ ।
ત્રિગુણગતિવિદૂર દર્શિતાદ્ય પ્રકટિતવેદવચોભિરીડ્યપાદ ॥ ૩૨॥

કરે કુરઙ્ગં સ્વકપર્દગઙ્ગં હારે ભુજઙ્ગં યમિહૃત્સુસઙ્ગમ્ ।
બાલાકૃતાઙ્ગં સિતભસ્મસઙ્ગમનઙ્ગમાતઙ્ગહરં ભજામિ ॥ ૩૩॥

- -
સ્કન્દઃ -
ઇતિ સ્તૌતિ સદા શમ્ભું કૈલાસેશગણેશ્વરઃ ।
ગણનાથો ગણવૃતસ્સદાશિવગણાગ્રણીઃ ॥ ૩૪॥

તત્પાતિ ગોપુરં શમ્ભોર્મણિપ્રાકારમપ્યસૌ ।
સ્વકીયૈર્ગણપૈસ્સાર્ધં ચન્દ્રચૂડસ્યશાસનાત્ ॥ ૩૫॥

હરિન્મણિકૃતં વરં હરિતગોપુરં પશ્ચિમે
વિરાજિતતલાઙ્ગુણૈર્વૃષલલામશ઼ૃઙ્ગપ્રભૈઃ ।
ગરુન્મણિવરપ્રભં વિતતરત્નસૌધોત્તમં
વરપ્રવરસુન્દરપ્રકટવપ્રકારકમ્ ॥ ૩૬॥

સ્વબાહુબલમાશ્રિતો દ્વિરદવક્ત્રજૈસ્સદ્ગણૈઃ
પ્રપાતિ (પ્રયાતીતિ) ગણનાયકશ્શિવપદાબ્જસંસેવકઃ ॥ ૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે ગણેશકૃતા શિવસ્તુતિઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૪ - કૈલાસવર્ણને ગણેશકૃતસ્તુતિઃ । ૨૯-૩૬॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 24 - kailAsavarNane gaNeshakRRitastutiH . 29-36..

Notes:

Skanda સ્કન્દ narrates eulogy to Śiva શિવ by Gaṇeśa ગણેશ, while describing about Gaṇeśa's residence towards the Western region of Mount Kailāsa કૈલાસ શૈલ, that has predominance of Emerald - viz. Harinmaṇi હરિન્મણિ / Marakatamaṇi મરકતમણિ / Garutmatmaṇi ગરુત્મત્મણિ.

Encoded and proofread by Ruma Dewan

*Ganeshakrita Shiva Stuti*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*